# Sudatiproktam Shivarchanopadesham

# સુદતિપ્રોક્તં શિવાર્ચનોપદેશમ્

## Document Information

Text title : Sudatiproktam Shivarchanopadesham

File name : sudatiproktaMshivArchanopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 28 madhyArjunamahimAnuvarNanam | 391-407||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# સુદતિપ્રોક્તં શિવાર્ચનોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
શિવાર્ચનં કુરુષ્વાદ્ય શિવસ્તુષ્ટો ભવિષ્યતિ ।
વ્યઙ્ગાપિ શિવપૂજા સા કાલેન ફલદા ધ્રુવમ્ ॥ ૩૯૧॥

સાઙ્ગા ચેચ્છિવપૂજા સા સદ્યઃ સર્વફલપ્રદા ।
સાઙ્ગં યઃ કુરુતે ભક્ત્યા શિવલિઙ્ગાર્ચનં સુત ॥ ૩૯૨॥

સ ધર્માદિફલાધ્યક્ષો ભવત્યેવ ન સંશયઃ ।
યઃ પૂજયતિ ગૌરીશં લિઙ્ગરૂપિણમવ્યયમ્ ॥ ૩૯૩॥

તમેવાતિપ્રયત્નેન સૌભગ્યમનુધાવતિ ।
યતઃ શિવાર્ચનફલં ભુક્તિર્મુક્તિશ્ચ શાશ્વતી ॥ ૩૯૪॥

સર્વદેવોત્તમઃ સામ્બો ભુક્તિમુક્તિફલપ્રદઃ ।
અપારકરુણાસિન્ધુર્દીનબન્ધુસ્તમર્ચય ॥ ૩૯૫॥

કાલત્રયેઽપિ દુઃખાનિ ન શિવાર્પિતચેતસામ્ ।
અતો વિધિવદારાધ્યમારાધય મહેશ્વરમ્ ॥ ૩૯૬॥

મહેશ્વરશ્ચ દુઃખાનિ ન નાશયતિ તે સદા (ચેત્તવ) ।
કઃ સમર્થોઽપરો દેવસ્તવ દુઃખનિવારણે ॥ ૩૯૭॥

સર્વેષામપિ દુઃખાનિ વિનાશયતિ શઙ્કરઃ ।
સ કિં ત્વદીયદુઃખાનિ ન નાશયતિ શઙ્કરઃ
(શમ્ભુર્નોનશયિષ્યતિ) ॥ ૩૯૮॥

શઙ્કરઃ શઙ્કરો યસ્માદતઃ શં તે પ્રયચ્છ(દાસ્ય)તિ ।
શઙ્કરં સાવધાનેન સમારાધય સાદરમ્ ॥ ૩૯૯॥

વિશ્વાસં કુરુ શ્રુત્યુક્તે શિવલિઙ્ગાર્ચને સુત ।
ગર્ભવાસાદિદુઃખાનિ યાન્યનન્તાનિ મે સુત ॥ ૪૦૦॥

કદાપિ ન ભવિષ્યન્તિ શ્રીમૃત્યુઞ્જયપૂજનાત્ ।
કુરુ વિશ્વસ્ય સતતં શિવલિઙ્ગાર્ચનં મુદા ॥ ૪૦૧॥

વિશ્વસ્ય ભાવિતભવાઃ શમ્ભું ભક્ત્યાઽર્ચયન્તિ યે ।
પ્રાપ્નુવન્તિ ન તે ભૂયો યોનિચક્રં દુરાસદં (સુદુર્ભગમ્) ॥ ૪૦૨॥

અયં સુત મદુક્તાર્થઃ શ્રુત્યુક્તાર્થો ન સંશયઃ ।
શિવલિઙ્ગાર્ચને નિત્યે સ્વેષ્ટદે શ્રુતિચોદિતે ॥ ૪૦૩॥

વિશ્વાસો ન ભવેદ્યસ્ય સ મહાપાતકી ધ્રુવમ્ ।
મહાપાતકયુક્તાનાં પાપિનાં દુષ્ટચેતસામ્ ॥ ૪૦૪॥

ન ભવિષ્યતિ વિશ્વાસઃ કૃતકર્માનુસારતઃ ।
યસ્ય ગ્રહા ભવિષ્યન્તિ પ્રતિકૂલા દુરાગ્રહાઃ ॥ ૪૦૫॥

તસ્ય નશ્યતિ વિશ્વાસઃ શિવલિઙ્ગાર્ચને ધ્રુવમ ।
શિવલિઙ્ગાર્ચને યસ્ય વિશ્વાસઃ શ્રુતિચોદિતે ॥ ૪૦૬॥

સ સર્વશો ભુક્તિ(ક્ત)ભોગઃ પ્રયાતિ શિવસન્નિધિમ્ ।
અનુકૂલા ગ્રહા યસ્યાનુગ્રહાદ્ગિરિજાપતેઃ ॥ ૪૦૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સુદતિપ્રોક્તં શિવાર્ચનોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૮ મધ્યાર્જુનમહિમાનુવર્ણનમ્ । ૩૯૧-૪૦૭॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 28 madhyArjunamahimAnuvarNan
. 391-407..

Notes:
Sudati સુદતિ delivers Upadeśa ઉપદેશ to her son about merits of worshiping Śiva શિવ.

Proofread by Ruma Dewan

*Sudatiproktam Shivarchanopadesham*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*